# लोपविधेः उपकारकं हलन्त्यम् ;एकं समीक्षणम्

**सैकतचौधुरी**
**शोधछात्रः,संस्कृतविभागः**
**राञ्चीविश्वविद्यालयः**

अष्टाध्याय्यां पदसाधुत्वसम्पादनार्थं बहूनि कौशलानि आविष्कृतानि जायन्ते। यथा-द्वित्वविधानं, प्रकृतिप्रत्ययविभाजनं, आदेशकल्पनं, आगमविधानं, ह्रस्व-दीर्घ-प्लुतादि व्यवस्था,उदात्तादि-स्वरविभागकल्पनं, वृद्धिविधानं, गुणविधानं, इत्वादिकार्यविधानं, समासकल्पनं, सज्ञापरिभाषादि-सूत्रभेदकल्पने सुत्राणामुपस्थापनं, कृत्प्रत्ययव्यवस्थेत्यादिभिः विविधैः कौशलैः सूत्रात्मकशैल्या पदसाधुत्वकल्पनं विधीयते। इत्येतदर्थं टि[१]-घु[२]-उपधा[३]-गुण[४]-वृद्ध[५]यादीनि बहूनि पारिभाषिकवचनानि उपकल्पितानि विद्यन्ते। प्रक्रियाकार्यनिर्वाहार्थं पदानां साधुत्वविवेचनार्थञ्च प्रतिपादितेष्वेतेषु कौशलविशेषेषु लोपविधिः अन्यतमः। अनेन विधिना लोपकार्येण वा प्रयोगार्हभूतानां पदानां प्रक्रियानिर्वहणं, शब्दानां साधुत्वसम्पादनं, शास्त्रीयरहस्योन्मोचनं सूत्राणां तात्पर्यविवेचनञ्च स्वल्पीयसा आयासेन वैज्ञानिकेन उपायेन वा भवति। अष्टाध्याय्यां प्रायतः सप्ततिसंख्यकानि लोपकार्यनिमित्तिकानि सूत्राण्युपपादितानि जायन्ते। अतः अष्टाध्याय्यां पुरस्कृतेषु बहुविधेषु उपायविशेषेषु लोपविधिः स्वतन्त्रं स्थानं भजते। अस्य लोपविधेः उपकारकत्वेन यानि इत्संज्ञाविधायकानि सूत्राणि उद्दिष्टानि जायन्ते,तेषु 'हलन्त्यम्'इति सूत्रमन्यतमम्। प्रबन्धेऽस्मिन् हलन्त्यम्[६] (पा.सू.१/३/३) इति इत्संज्ञाविधायकं सूत्रम् अधिकृत्य विचारः प्रस्तूयते।

'हलन्त्यम्' इतीदं सूत्रम् अष्टाध्याय्याः प्रथमाध्यायस्य तृतीयपादस्य तृतीयं सूत्रं वर्त्तते। 'उपदेशेऽजनुनासिक इत्'[७] (पा.सू.१/३/२) इति सूत्रात् 'उपदेशे', 'इत्' च इति पदद्वयम् अत्र अनुवर्त्तते। सूत्रमिदम् अष्टाध्याय्यां सकृदुपलभ्यते, परन्तु सिद्धान्तकौमुद्यां द्विवारम् उपलभ्यते। अतः इदानीं मनसि शङ्केयं समुदेति यत्, 'हलन्त्यम्' इति सूत्रस्य द्विरावृत्तेः किं कारणम् अस्ति ? इति चेत् अत्रोच्यते- "अन्योऽन्याश्रयदोषस्य परिहाराय "। 'हलन्त्यम्' इति सूत्रे 'हल्' इति एकं पदम्, 'अन्त्यम्' इति चापरं पदं वर्त्तते। वाक्यार्थबोधं प्रति पदार्थबोधस्य कारणत्वात् प्रथमतः हल्पदार्थजिज्ञासा समुदेति। तत्र व्यञ्जनवर्णात्मकं प्रत्याहाररूपं हल् अथवा माहेश्वरचतुर्द्दशसूत्रात्मकं प्रत्याहाररूपं हल् अथवा माहेश्वरचतुर्द्दशसूत्रात्मकं हल्। अत्र अनेकार्थबोधकस्य हल्पदस्य अस्मिन् सूत्रे किमर्थकं हल्पदं ग्रहणीयम्? इति शङ्का मनसि सञ्जायते। तत्र प्रत्याहारबोधकस्य हल्पदस्य बोधाय प्रत्याहारविधायकम् "आदिरन्त्येन सहेता"[८](पा.सू.१/१/७१) इति सूत्रेण प्रत्याहारविधानाय इत्संज्ञकवर्णग्रहणाय 'हलन्त्यम्' इति सूत्रम् अपेक्षते। एवञ्च 'हलन्त्यम्' इति सूत्रं प्रत्याहारस्य कृते 'आदिरन्त्येन सहेता' इति सूत्रम् आश्रियते। 'आदिरन्त्येन सहेता' इति सूत्रं च इत्संज्ञकवर्णं ग्रहणस्य कृते 'हलन्त्यम्' इति सूत्रम् आश्रियते। इत्थमत्र अन्योन्याश्रयदोषः उत्पद्यते।

एतस्य अन्योन्याश्रयदोषस्य परिहाराय 'हलन्त्यम्' भट्टोजिदीक्षितेन सिद्धान्तकौमुदीग्रन्थे उपायस्वरूपं 'हलन्त्यम्' इति सूत्रं द्विवारम् आवृत्तम्। तत्र 'हलन्त्यम्' इति प्रथमसूत्रे 'उपदेशेऽजनुनासिक इत्' इति सूत्रात् इत्पदमात्रमेव अनुवर्त्तते। अत एव 'हलन्त्यम्' इति प्रथमसूत्रेण 'हल्'[९](मा.सू.१४) इति माहेश्वरचतुर्द्दशसूत्रे अन्त्यस्य

लकारस्य इत्संज्ञा विधीयते। ततः इत्संज्ञायाम् इत्पदार्थे बोधे 'आदिरन्त्येन सहेता' इति सूत्रेण अन्त्येत्संज्ञकेन लकारेण सह 'हयवरट्'[१०](मा.सू.५) इति सूत्रस्थं हकारं गृहीत्वा हल्प्रत्याहारं विधाय हल्पदार्थः बोध्यते। ततः हल्पदार्थबोधे 'हलन्त्यम्' इति आवृत्तद्वितीयसूत्रे 'उपदेशेऽजनुनासिक इत्' इति सूत्रात् 'उपदेशे', 'इत्' च इति पदद्वयम् अनुवर्त्तते। अतएव 'हलन्त्यम्' इत्यावृत्तद्वितीयसूत्रेण उपदेशावस्थायाम् अन्त्यस्थानां हल्-प्रत्याहाररूपाणां व्यञ्जनवर्णानाम् इत्संज्ञा विधीयते। इत्थं 'हलन्त्यम्' इति सूत्रस्य आवृत्तिरूपेण उपायेन अन्योऽन्याश्रयदोषः परिहरणीय इति सिद्धान्तकौमुदीकारस्य दीक्षितस्याशयः अवगन्तव्यः।

'हलन्त्यम्' इत्यावृत्तप्रथमसूत्रे 'हलि अन्त्यम्' इति विग्रहे 'सप्तमी शौण्डैः'[११](पा.सू.२/१/४०) इति सूत्रे 'सप्तमी' इति योगं विभज्य 'सह सुपा'[१२](पा.सू.२/१/४) इत्यत्र च अनुवर्त्त्य सुप्सुपासमासेन 'हलन्त्यम्' इति रूपं निष्पद्यते। प्रसङ्गेऽस्मिन् दीक्षितेन प्रौढमनोरमाग्रन्थे 'हलन्त्यम्' इत्यत्र षष्ठीतत्पुरुषसमासं समाहारद्वन्द्वं चेति समासद्वयमुपस्थाप्य पुनश्च तेनैव अत्र दूषणमुपद्भाव्य अन्योऽन्याश्रयदोषस्य परिहाराय निर्दोषरूपेण सूत्रावृत्तिपक्ष एव प्रतिपादितः। तद्यथा- 'हलः अन्त्यम्' इति विग्रहे षष्ठीतत्पुरुषसमासेन 'हलन्त्यम्' इत्येतत् पदं निष्पादयितुं न शक्यम्। तथा च 'हस्य ल्' इति विग्रहेण 'हल्' इत्येतत् पदमपि निष्पादयितुं न शक्यते। अत्र षष्ठीविभक्तेः अर्थः सामीप्यं भवति। 'ब्राह्मण-कम्बल' इत्यादौ षष्ठीतत्पुरुषसमासपक्षे षष्ठीबिभक्तेः सामीप्यार्थे ब्राह्मणसमीपवर्त्ती अन्यस्वामिकः कम्बलः प्रतीयते। तथा च चित्रगुपदे चित्रगवीणां समीपवर्त्ति वृक्षादि प्रतीयते। अपि तु ब्राह्मणस्वामिकः कम्बलः एव प्रतीयते। तथा च चित्रगुपदेन चित्रगवीणां प्रभुरेव प्रतीयते। अतएव 'ब्राह्मणस्य कम्बलः' इति 'चित्रा गावो अस्य' इति च विग्रहवाक्यप्रयोगोऽपि नाङ्गीकर्त्तुं शक्यते। इत्थं हलः अन्त्यम् इत हस्य ल् इति च विग्रहवाक्यम् षष्ठीतत्पुरुषसमासो वा नाङ्गीकर्त्तुं शक्यते। किं च 'हसमीपो ल्'=हल् इति मध्यपदलोपि-तत्पुरुष-स्वीकारे गौरवशब्दरूपः दोषः भवति।

अपि च हल् च ल् च इति विग्रहे 'हल्-ल्' इति समाहारद्वन्द्वसमासे 'संयोगान्तस्य लोपः'[१३](पा.सू.८/२/२३) इति सूत्रेण अन्त्यस्य लकारस्य लोपः कर्त्तुं न शक्यते। अत्र लकारस्य उण्त्वात् 'यणः प्रतिषेधो वाच्यम्' इति वार्त्तिकेन लोपः निषिध्यते। अपि च 'यणः प्रतिषेधो वाच्यम्' इति वार्त्तिकप्रत्याख्यानपक्षेऽपि संयोगान्तस्य लकारस्य लोपो भवितुं नार्हति। यतः 'झलो झलि'[१४](पा.सू.८/२/२६) इति सूत्रात् झल् ग्रहणमपकृष्य संयोगान्तस्य झलः एव लोपविधानात् 'हल्- ल्' इत्यत्र संयोगान्तस्य लकारस्य झल् भिन्नत्वात् लोपः न जायते। अतः अत्र केनापि प्रकारेण संयोगान्तस्य लकारस्य लोपकरणासम्भवेऽपि मूलभूतः समाहारद्वन्द्वसमासः नैव भवितुमं अर्हति। किञ्च सहविवक्षायामेव द्वन्द्वसमासो भवितुं शक्नोति। 'हल् ल्' इत्यवस्थायां नैव भवितुं शक्नोति। अतः 'हल् च ल् च' इत्यत्र सहविवक्षा नैव सम्भवेत्। अतएव अन्योऽन्याश्रयदोषस्य परिहाराय हल च ल् च इति इत्थं समाहारद्वन्द्वस्य कल्पना असमीचीना भवति। अतएव 'हलन्त्यम्' इत्येतस्य सम्पूर्णसूत्रस्य आवृत्तिकरणमेव अन्योऽन्याश्रयदोषस्य परिहाराय समीचीनम् अवलम्बनम् इति मनोरमाकारस्य दीक्षितस्य आशयः अवगन्तव्यः।।

**पादटीका : -**

[1]. पा.सू.१/१/६४

[2].पा.सू.१/१/२०

[3].पा.सू.१/१/६५

[4].पा.सू.१/१/२

[5].पा.सू.१/१/१

[6].पा.सू.१/३/३

[7].पा.सू.१/३/२

[8].पा.सू.१/१/७१

[9].मा.सू.१४

[10].मा.सू.५

[11].पा.सू.२/१/४०

[12].पा.सू.२/१/४

[13].पा.सू.८/२/२३

[14]. पा.सू.८/२/२६

**सहायकग्रन्था :–**


१. अष्टाध्यायीसूत्रपाठः,दीक्षितपुष्पा, संस्कृतभारती, नवदेहली, २०१०।

२. अष्टाध्यायीसूत्रपाठः,मिश्रनारायणः,चौखम्बा ओरियन्टालिया, वाराणसी, १९७७।

३. लघुशब्देन्दुशेखरः, मिश्रविश्वनाथः, पञ्चसन्ध्यन्तः, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली १९९८।

४. लघुशब्देन्दुशेखरः, शास्त्रीवैकुण्ठनाथः,अव्ययीभावान्तः, चौखम्बा सुरभारती प्रकाशन, १९९४।

५. वैयाकरणसिद्धान्तकौमुदी, प्रथमभागः, बालमनोरमा-तत्त्वबोधिनीटीका, मोतिलाल बनारसीदास, दिल्ली, २००५।

६. वैयाकरणमहाभाष्यम्, डाः आचार्यसुद्युम्नः, रामलाल कपूर ट्रष्ट, रेवलि, सोनीपत,२००८।

७. वैयाकरणमहाभाष्यम्, मीमांसकयुधिष्ठिरः, रामलाल कपूर ट्रष्ट, रेवलि, सोनीपत,२००८।

८. परिभाषेन्दुशेखरः, मिश्रविश्वनाथः, चौखम्बा सुरभारती प्रकाशन, वाराणसी,२००५।

९. अष्टाध्यायीसूत्रपाठः, प्रह्लादटिप्पणीसहितः, सम्पादकः- पं. सत्यनारायणशास्त्री खण्डुडी, कृष्णदास संस्कृत सीरीज ६५, कृष्णदास संस्कृत अकादमी, वाराणसी-२२१००१, १९८५।

१०. महाभाष्यम्,(नवाह्निकम्), सम्पादकः- चारुदेव शास्त्री, मोतिलाल बनारसीदास, दिल्ली, १९६८।

११. वाक्यपदीयम्, ब्रह्मकाण्डम्- श्री वामदेव आचार्यः, चौखम्बा कृष्णदास संस्कृत अकादमी, वाराणसी-२२१००१,१९८७।

१२. महाभाष्यम्, सम्पादक :- श्रीगुरुप्रसादशास्त्री, राष्ट्रियसंस्कृतसंस्थानम्, नइ देल्ली- ११००५८,२००६।

१३. वैयाकरणसिद्धान्तकौमुदी,व्याख्याकारः-गोपालदत्तपाण्डेय, चौखम्बा कृष्णदास संस्कृत अकादमी, वाराणसी-२२१००१।

१४. वैयाकरणसिद्धान्तकौमुदी,व्याख्याकारःपं. वमचन्द्र झा, चौखम्बा कृष्णदास संस्कृत अकादमी, वाराणसी-२२१००१,२००९।

१५. व्याकरणशास्त्रेतिहासः, सम्पादकः- लोकमणिदाहालः,भारतीय विद्याप्रकाशन, जवाहनगर,दिल्ली- २००७।

१६. काशिकावृत्तिः, चौखम्बा कृष्णदास संस्कृत अकादमी, वाराणसी-२२१००१।

१७. संस्कृतसाहित्येतिहासः , सम्पादकः - कपिलदेवद्विवेदी, रामनारायणलालविजयकुमार २, कटरारोड, इलाहावाद,१९८९।